Narasimha Kavacham

श्रीनृसिंहकवचम्

NityaPaath
nityapaath.com/narasimha-kavacham/

SHLOKA · श्लोक

1 नृसिंहकवचं वक्ष्ये प्रह्लादेनोदितं पुरा।
सर्वरक्षाकरं पुण्यं सर्वोपद्रवनाशनम्॥

2 सर्वसम्पत्करं चैव स्वर्गमोक्षप्रदायकम्।
ध्यात्वा नृसिंहं देवेशं हेमसिंहासनस्थितम्॥

3 विवृतास्यं त्रिनयनं शरदिन्दुसमप्रभम्।
लक्ष्म्यालिङ्गितवामाङ्गं विभूतिभिरुपाश्रितम्॥

4 चतुर्भुजं कोमलाङ्गं स्वर्णकुण्डलशोभितम्।
उरोजशोभितोरस्कं रत्नकेयूरमुद्रितम्॥

5 तप्तकाञ्चनसंकाशं पीतनिर्मलवाससम्।
इन्द्रादिसुरमौलिस्थस्फुरन्माणिक्यदीप्तिभिः॥

6 विराजितपदद्वन्द्वं शङ्खचक्रादिहेतिभिः।
गरुत्मता च विनयात्स्तूयमानं मुदान्वितम्॥

7 स्वहृत्कमलसंवासं कृत्वा तु कवचं पठेत्।
नृसिंहो मे शिरः पातु लोकरक्षात्मसम्भवः॥

8 सर्वगोऽपि स्तम्भवासः फालं मे रक्षतु ध्वानिम्।
नृसिंहो मे दृशौ पातु सोमसूर्याग्निलोचनः॥

9 स्मृतिं मे पातु नृहरिर्मुनिवर्यस्तुतिप्रियः।
नासां मे सिंहनासस्तु मुखं लक्ष्मीमुखप्रियः॥

10 सर्वविद्याधिपः पातु नृसिंहो रसनां मम।
वक्त्रं पात्विन्दुवदनः सदा प्रह्लादवन्दितः॥

11 नृसिंहः पातु मे कण्ठं स्कंधौ भूभरणांतकृत्।
दिव्यास्त्रशोभितभुजो नृसिंहः पातु मे भुजौ॥

12 करौ मे देववरदो नृसिंहः पातु सर्वतः।
हृदयं योगिसाध्यश्च निवासं पातु मे हरिः॥

13 मध्यं पातु हिरण्याक्षवक्षःकुक्षिविदारणः।
नाभिं मे पातु नृहरिः स्वनाभिब्रह्मसंस्तुतः॥

14 ब्रह्माण्डकोटयः कट्यां यस्यासौ पातु मे कटिम्।
गुह्यं मे पातु गुह्यानां मंत्राणां गुह्यरूपधृक्॥

15 ऊरू मनोभवः पातु जानुनी नररूपधृक्।
जंघे पातु धराभारहर्ता योऽसौ नृकेसरी॥

16 सुरराज्यप्रदः पातु पादौ मे नृहरीश्वरः।
सहस्रशीर्षा पुरुषः पातु मे सर्वशस्तनुम्॥

17 महोग्रः पूर्वतः पातु महावीराग्रजोऽग्नितः।
महाविष्णुर्दक्षिणे तु महाज्वालस्तु निर्ऋतौ॥

18 पश्चिमे पातु सर्वेशो दिशि मे सर्वतोमुखः।
नृसिंहः पातु वायव्यां सौम्यां भूषणविग्रहः॥

19 ईशान्यां पातु भद्रो मे सर्वमङ्गलदायकः।
संसारभयदः पातु मृत्योर्मृत्युर्नृकेसरी॥

PHALASHRUTI · फलश्रुति

20 इदं नृसिंहकवचं प्रह्लादमुखमण्डितम्।
भक्तिमान्यः पठेन्नित्यं सर्वपापैः प्रमुच्यते॥

21 पुत्रवान्धनवाँल्लोके दीर्घायुरुपजायते।
यं यं कामयते कामं तं तं प्राप्नोत्यसंशयम्॥

22 सर्वत्र जयमाप्नोति सर्वत्र विजयी भवेत्।
भूम्यन्तरिक्षदिव्यानां ग्रहाणां विनिवारणम्॥

23 वृश्चिकोरगसम्भूतविषापहरणं परम्।
ब्रह्मराक्षसयक्षाणां दूरोत्सारणकारणम्॥

24 भूर्जे वा तालपत्रे वा कवचं लिखितं शुभम्।
करमूले धृतं येन सिद्ध्येयुः कर्मसिद्धयः॥

25 देवासुरमनुष्येषु स्वं स्वमेव जयं लभेत्।
एकसन्ध्यं त्रिसन्ध्यं वा यः पठेन्नियतो नरः॥

26 सर्वमङ्गलमाङ्गल्यं भुक्तिं मुक्तिं च विन्दति।
द्वात्रिंशत्तु सहस्राणि शुद्धात्मा यः पठेन्नरः॥

27 कवचस्यास्य मंत्रस्य मंत्रसिद्धिः प्रजायते।
अनेन मंत्रराजेन कृत्वा भस्माभिमन्त्रणम्॥

28 तिलकं विन्यसेद्यस्तु तस्य ग्रहभयं हरेत्।
त्रिवारं जपमानस्तु दत्तं वार्यभिमन्त्र्य च॥

29 प्राशयेद्यं नरं मन्त्रं नृसिंहध्यानमाचरेत्।
तस्य रोगाः प्रणश्यन्ति ये च स्युः कुक्षिसंभवाः॥

30 किमत्र बहुनोक्तेन नृसिंहसदृशो भवेत्।
मनसा चिन्तितं यत्तु स तच्चाप्नोत्यसंशयम्॥

DHYANAM · ध्यान

31 गर्जन्तं गर्जयन्तं निजभुजपटलं स्फोटयन्तं हरन्तं
रूप्यन्तं तापयन्तं दिवि भुवि दितिजं क्षेपयन्तं शिरन्तम्।
क्रन्दन्तं रोषयन्तं दिशि दिशि सततं संभरन्तं हरन्तं
वीक्षंतं घूर्णयन्तं करनिकरशतैर्दिव्यसिंहं नमामि॥

Text checked against: Nrisimha Kavacham, Khemraj Shrikrishnadas, Shri Venkateshwar Press, Bombay; printed Shaka 1818 / Vikrama 1953 (= 1896-97) per the colophon. Meanings, audio and all scripts at nityapaath.com/narasimha-kavacham/